रजतजयन्ती ग्रन्थमालाया: - 18

# तदेव गगनं सैव धरा

श्रीनिवास रथः

राष्ट्रिय-संस्कृत-संस्थानम्
मानित विश्वविद्यालय, नई दिल्ली-११००५८

# प्राक्कथनम्

(द्वितीयसंस्करणस्य)

सहृदयहृदयतडागे भावतरङ्गमुत्पादयितुं समर्थानाम् आचार्य-श्रीनिवासरथमहोदयानां सुमधुरकवितानां सङ्ग्रहः **तदेव गगनं सैव धरा**-नाम्ना इह विराजते। ***तदेव गगनं सैव धरा*** इति आरभ्य **तव मुकुलितनयने** इति गीत्यन्तं ४१ कविताः कविनात्र सङ्कलिताः। गीतीष्वेतासु कविः अद्यतनीने समाजे जनानां विपरिवर्तमानं स्वभावं, व्यवहारविपर्यासं, सदाचारविमुखतां, नेतृणां स्वार्थपरतां, अशान्तिभूयिष्ठां जीवनयात्रां, भौतिकभोगातिशयित-जीवनशैलीं, जीवनदृष्टिविपर्यासं, युवजनमनस्सु व्याप्तं निराशावादं च विशदयन् स्वभावोक्तेः कामपि नूतनां भङ्गीं प्रस्तौति। कवितासु विगर्हितकर्माण्यभिलक्ष्यीकृत्य कविना कृतः उद्गारः भारतीयसंस्कृतिं प्रति कवेः सदाशयं संवेदनशीलतां च स्फुटीकरोति। भारतजननी, भारतम्, रक्ष तद् भारतम् इत्यादिकविताः सर्वात्मना भारतमातरं सेवितुं वाचकान् प्रेरयति। जयति संस्कृतभारती इति गीत्यां संस्कृतवाङ्मयम् अनुपममुपवर्णयन् संस्कृतस्य सर्वमङ्गलभावनाविधायकत्वं मुक्तकण्ठमुद्घोष्य स्तौति। उज्जयिनी जयते, सिप्रा सर्वहिता, मध्यप्रदेश जय हे, शिमला इत्यादिषु तत्तत्स्थानमहिमा अनन्यादृशशैल्या वर्णित उपलभ्यते। काव्यवस्तुनः नव्यता, काव्यानुकूल - लयविधानं, भाषान्तरपदप्रभावसाङ्कर्यं विनैव नव्यकाव्यशैलीप्रस्तुतिः, परम्परानुमोदितपदयोजनायामपि

# नव्यं संस्कृतकाव्यम्

अनाघ्राम्नायादन्यत्र नूतनच्छन्दसामवतारमाविष्कुर्वताऽऽदिकविना वाल्मीकिना या संस्कृतकाव्यपरम्पराविर्भाविता भगवद्व्यास-भास-कालिदास-शूद्रक-भवभूति-भारवि-माघ-बाणामरु-शङ्कर-क्षेमेन्द्र-गोवर्धन-जयदेव-जगन्नाथ-प्रभृतिभिः काव्यानुसन्धानदत्तचित्तैरन्यैश्च सततं संवर्धिता साद्यापि नवं नवं रूपमादधाना जागर्तीति न भवति कस्य प्रमोदकारणं सचेतसः ? यथा प्रतियुगं नवनवानि काव्यरूपाण्यवातरन्, तथैव नवानि काव्यदर्शनान्यपि तदनुसारीणि व्यवातिष्ठन् । तद्यथाह समुद्रबन्धोऽलङ्कारसर्वस्वटीकायाम् – "विशिष्टौ शब्दार्थौ काव्यम् । तद्वैशिष्ट्यं धर्ममुखेन, व्यापारमुखेन, व्यङ्ग्यमुखेनेति त्रयः पक्षाः" इति ।

तत्र धर्मोऽपि द्विविधोऽलङ्काररूपो गुणरूपश्च । तथैव व्यापारोऽपि द्विविधो वक्रोक्तिर्भावकत्वञ्च । तदित्थं प्राधान्येन पञ्चरूपतया व्यवस्थित आलङ्कारिकसमयः । तत्रालङ्कारप्राधान्यं मन्वाना भामहाद्या, रीतिप्राधान्यवादिनो वामनादयो, वक्रोक्तिमेव काव्यजीवितमिति स्वीकुर्वन्तः कुन्तकादयः, अभिधातो द्वितीयेन विभावादीनां साधारणीकरणात्मकेन भावकत्वव्यापारेण काव्ये चारुत्वप्रतीतिं स्वीकुर्वन्तो भट्टनायकादयः, न्यग्भावितवाच्याद्यर्थोऽभिधादिविलक्षणप्रकारेण व्यञ्जनाख्येन व्यापारेणाभिव्यक्तो व्यङ्ग्योऽर्थः काव्यात्मेति प्रतिष्ठापयन्त आनन्दवर्धनादयश्च स्वं स्वं काव्यदर्शनं व्यवस्थापितवन्तः ।

अथ सैषा संस्कृतकाव्ययात्रा भारतीय-काव्यशास्त्रयात्रा च ख्रीस्तीयाष्टादशशतकं यावद् विविधप्रस्थानगतिनिरूपिताऽपि निर्बाधा प्रचलन्ती आङ्ग्लाधिपत्येन सहैव पाश्चात्त्यदेशसम्पर्कजनितेनामितेन प्रभावेण भिन्नमेव रूपं भजते ख्रीस्तीयैकोनविंश-विंशशतक-सम्मितेऽर्वाचीने समये । संस्कृतकाव्यस्य साम्प्रतिकं स्वरूपं स्वस्मिन् स्वीयं पुराणं शाश्वतं तत्त्वं धारयदपि किमपि कालकल्पितमन्यत्त्वमप्यङ्गीकरोत्येव । दृश्यते चात्र भिन्नप्रवाहेव साम्प्रतिककाव्यधारा प्राचां मुक्तककाव्यसरणिमनुवर्तमानेव ।

साम्प्रतिककाव्यस्वरूपसमालोचनाय द्रष्टव्या भवति सैव काचिदन्यरूपा विरलविरलापि प्रवहन्ती काव्यधारा प्रायशश्चालङ्कारिकैरदृष्टेवोपेक्षिता । सा च काव्यधारा जात्यपरनाम-स्वभावोक्तिभाजनेषु मुक्तकेषु प्रवहन्ती दृश्यते । अस्ति च तत्काव्यदर्शनं स्वभावोक्तिवादिषु संरूढं तत्तदाचार्यैर्न्यक्षेण प्रकाशितं यत्पुनरद्य साम्प्रतिकसंस्कृतकाव्यशास्त्रमारचयितुं भजते विमर्शपात्रताम् । भामहेन स्वभावोक्तेर्नाम गृहीतं, किन्तु तत्त्वतः सोपेक्षिता तत्रार्थस्य तदवस्थत्वमात्रसंस्थितेः ।

# तदेव गगनं सैव धरा

जीवनगतिरनुदिनमपरा
तदेव गगनं सैव धरा ॥

पापपुण्यविधुरा धरणीयं
कर्मफलं भवतादरणीयम् ।
नैतद्-वचोऽधुना रमणीयं
तथापि सदसद्-विवेचनीयम् ॥
मतिरतिविकला
सीदति विफला
सकला परम्परा । तदेव.....

शास्त्रगता परिभाषाऽधीता
गीतामृतकणिकापि निपीता ।
को जानीते तथापि भीता
केन हेतुना विलपति सीता ॥
सुतरां शिथिला
सहते मिथिला
परिकम्पितान्तरा । तदेव......

# मलिनतामयते

सहसा मनो मलिनतामयते।
तमसि विलीने निराशगगने
मुक्तिं कामयते।। सहसा.....

प्रभातवातातपोन्मीलिता
लता सुललितोपवनभूषिता।
मधुरमधुपसङ्गीतभाविता
नृत्यति नियतं या स्म पुलकिता।।

अतर्कितोल्कापातविदलिता
नियतिं गर्हयते। सहसा......

पश्यतु जनता सवाष्पनयनं
केवलमिह यदि नियतिनर्तनम्।
किं कुरुते संस्कृतिगुणवचनं
योगदर्शनाध्यात्मचिन्तनम्।।

कविता वा कतमं प्रयोजनं
सम्प्रति पूरयते। सहसा.....

अपूर्वा पूर्वदिङ्मुखाकुलता
ग्रस्तोदित इव विभाति सविता।
प्रसरति भुवि छाया कलङ्किता
जनमनोदशा शापशङ्किता।।

कथमपि समयाशानुशासनं
धरणी धारयते। सहसा.....

# राष्ट्रिय-संस्कृत-संस्थानम्

मानित विश्वविद्यालय, ५६-५७, इन्स्टीट्यूशनल एरिया,
जनकपुरी, नई दिल्ली-११००५८